N.A.

Vishesh vyapti : chintamani

विशेष व्याप्ति : chintamani

Sanskrit

Paper – Handwritten

N.A. (Very old)

3 Folio

13.8" X 5.5"

Incomplete

बं ६२ -

विशेषव्याप्तिः चिन्तामणि कृष्णा

चिन्तामणेः शिवः

दि॥व्या॥

॥ श्रीगणेशाय नमः श्रीविश्वनाथाय नमः अथ चिन्तामणिप्रारम्भः ॥ यद्वृत्तिप्रतियोगिव्यधिकरण
स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसमानाधिकरण्यं। यत्समानाधिकरणान्योन्याभावप्रतियोगियद्वन्न भवति तेन स
मं तस्य सामानाधिकरण्यं वा स्वसमानाधिकरणान्योन्याभावप्रतियोगियद्वत् न कत्वं वा १ अन्यवृत्तिवह्निर्न दूषितो
ऽन्यवृत्तिधूमवन्निष्ठाभावान्योन्याभावप्रतियोगितात्यधिकरणवह्निधूमयोर्नव्याप्तिः किन्तु तत्तद्धूमस्य समाना
धिकरणतत्तद्वह्निना। नचैवं धूममात्रेन व्याप्तिरिति वाच्यम् सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् धूमसम्ब
न्धित्तज्ज्ञाप्य पृ एव युगपद् उत्पन्नविनष्टयोश्च व्याप्तेरेव कर्मणि च संयोगाभावः प्रतियोग्यसामानाधिकरणः य
द्धाप्रतियोगिप्रो वैय्यधिकरण्यावच्छेदकावच्छिन्नमत्यन्ताभावप्रतिविशेषणम् कर्मणि च संयोगाभावस्य प्रतियोगिवै
यधिकरण्यावच्छिन्नत्वमेव न चान्योन्याभावस्याव्याप्यवृत्तित्वम् अभेदस्याभावादित प्रत्यभिज्ञानात् व्याप्य

व्यापकभावाज्ञानेपि नसतस्ताथात्वेनाज्ञायमानस्य सम्बन्धत्वेनैन भावस्य पक्षधर्मत्वम् नचैवमननुग
मोऽदोषाय कस्य काव्याप्तिरिति अननुगतमस्यैव लक्ष्यत्वात् अथ धूमवानिति ह्रिह्

२ संयोगादौ तथात्वदर्शनात् किन्तु वह्न्यार्द्रेन्धनप्रभववह्नित्वम् धूमसम्बन्धितावच्छेदकम् नाद्यश

चिन्तामः स्य व्याप्यमेव। अथवा यत्समानाधिकरण्यावच्छेदकावच्छिन्नम् यस्य स्वरूपम् तत्तस्य व्याप्यम्

वह्निसामानाधिकरण्यम् हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ नुपाधिना अत एव साधनता

वच्छेदकभिन्नेन येन साधनाभिन्ने साध्यसम्बन्धो वच्छिद्यते स एव तत्र साधने विशेषणमुपा

धिरिति वदन्ति अत एव च साधनव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वम् लक्षणेन धू

वम् व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदम् विना तदु

भयसम्बन्धाभावादेव स्यम् साध्यसम्बन्धितावच्छेदकमस्ति तदेव च साधनाव

च्छिन्नसाध्यव्यापकम् त[illegible]तोपाधिः अत एव व्यभिचारे अवश्यम् उपाधिरिति

संगच्छते अन्यथा व्यभिचारादेव तत्रागमकत्वे न व्यभिचारित्वेन तदनुमान

मप्रयोजकत्वात् अत एव च तस्य सम्बन्धितावच्छेदकरूपलक्षणा व्याप्तिः

भावप्रतियोगिन आर्द्रेन्धनवत्वादेरुपाधेर्यो ऽत्यन्ताभावस्तेन समम साध्यस्य धूमादेः
सामानाधिकरण्याभावात् उपाधेः साध्यव्यापकत्वात् एतद्देवयावत्स्वव्यभिचारि
व्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वम् गीयते यद्वा यावद्यत्सामानाधि
करणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यम् यस्य तस्य
तद्देवानौपाधिकत्वम् सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिन उपा
धेर्यः अत्यन्ताभावस्तेन समम् हेतोः सामानाधिकरण्यम् उपाधेः साधनाव्यापकत्वा
त् यद्वा यत्सम्बन्धितावच्छेदकरूपत्वम् यस्य तस्य सा व्याप्तिः तथाहि धूमस्य वह्निस
म्बन्धित्वे धूमत्वम् अवच्छेदकम् धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धि
त्वेन वह्नित्वम् न अवच्छेदकम् धूमासम्बन्धिनि गतत्वात् न ह्यतिप्रसक्तमवच्छेदकम्

चिन्ताम०

श्रीगणेशायनमः अथ विशेषव्याप्तिचिन्तामणिप्रारम्भः यद्धर्मप्रतियोगिव्यधिकरणस्वसमानाधिकरणा
त्यन्ताभावाप्रतियोगिसामानाधिकरण्यम् ॥ यत्सामानाधिकरणान्योन्याभावप्रतियोगियद्व
न्न भवति तेन समम् तस्य सामानाधिकरण्यम् वा ॥ स्वसमानाधिकरणान्योन्याभावाप्रतियोगिय
द्वत्तकत्वम् वा ॥ अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठाभावान्योन्याभावप्रतियोगित्वा
त् व्यधिकरणवह्निधूमयोर्नाव्याप्तिः किन्तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना न चै
वम् धूममात्रे नव्याप्तिरिति वाच्यम् सर्वधूमस्य क्वेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् धू
मसम्बन्धिवह्निस्तज्ज्ञाप्य एव युगपदुत्पन्नविनष्टयोश्चव्याप्तेरेव कर्मणि च संयोगाभावः प्र
तियोग्यसामानाधिकरणः यद्धर्मप्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नमत्यन्ताभावविशेषणम् क
र्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वेन न चान्यान्या

भानस्याव्याप्यवृत्तित्वम् अभेदस्याबाधितप्रत्यभिज्ञानात् व्याप्यव्यापकभावाज्ञा
नेपिवस्तु सतस्तथात्वेनाज्ञायमानस्यसंबन्धत्वेनैव भानस्यषष्ठ्यर्थत्वम् । नचैवम्
अननुगमौ दोषावयकस्य कार्व्याप्तिरित्यननुगतस्यैव लक्षणत्वात् अथ धूमवत्तिव
न्हिहृदैनस्त: धूमवान् वन्हिमद्हृदौ नमवतीतिप्रतीतेर्व्याप्य(वन्हि)प्रतियोगिकौ वन्हिव
न्हिमतोरत्यन्तान्योन्याभावौ धूमवति विद्येते इति कथमेते लक्षणे इति चेत्तादृ
दृशाभावानभ्युपगमात् अभ्युपगमे वा तत्र तद्धूमप्रतियोगिनव(वन्हि)न्हिमत्त्वो
नौपाधिकत्वम् व्याप्तिः । तच्च यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगि
तानवच्छेदकावच्छिन्नम् यत् तत्प्रतियोगिकात्यन्ताभावप्रसमानाधिकरणम् यत्तेन
समम् सामानाधिकरण्यम् नह्येवम् सोपाधिः तत्र साधनसामानाधिकरणात्यन्ता